# Shri Angaraka AshtottarashatanAma stotraM

# શ્રીઅઙ્ગારકાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : aNgArakAShTottarashatanAmastotram

File name : angAraka108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth

Proofread by : KSR Ramachandran

Description-comments : See corresponding nAmAvalI

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 19, 2024

*sanskritdocuments.org*

Shri Angaraka AshtottarashatanAma stotraM

# શ્રીઅઙ્ગારકાષ્ટોત્તરશતનામસ્તોત્રમ્

મઙ્ગલાષ્ટોત્તરશતનામસ્તોત્રમ્

મઙ્ગલ બીજ મન્ત્ર - ૐ ક્રાઁ ક્રીં ક્રૌં સઃ ભૌમાય નમઃ ॥

ૐ મહીસુતો મહાભાગો મંગળો મંગળપ્રદઃ ।
મહાવીરો મહાશૂરો મહાબલપરાક્રમઃ ॥ ૧॥

મહારૌદ્રો મહાભદ્રો માનનીયો દયાકરઃ ।
માનજોઽમર્ષણઃ ક્રૂરઃ તાપપાપવિવર્જિતઃ ॥ ૨॥

સુપ્રતીપઃ સુતામ્રાક્ષઃ સુબ્રહ્મણ્યઃ સુખપ્રદઃ ।
વક્રસ્તમ્ભાદિગમનો વરેણ્યો વરદઃ સુખી ॥ ૩॥

વીરભદ્રો વિરૂપાક્ષો વિદૂરસ્થો વિભાવસુઃ ।
નક્ષત્રચક્રસઞ્ચારી ક્ષત્રપઃ ક્ષાત્રવર્જિતઃ ॥ ૪॥

ક્ષયવૃદ્ધિવિનિર્મુક્તઃ ક્ષમાયુક્તો વિચક્ષણઃ ।
અક્ષીણફલદઃ ચક્ષુર્ગોચરશ્શુભલક્ષણઃ ॥ ૫॥

વીતરાગો વીતભયો વિજ્વરો વિશ્વકારણઃ ।
નક્ષત્રરાશિસઞ્ચારો નાનાભયનિકૃન્તનઃ ॥ ૬॥

કમનીયો દયાસારઃ કનત્કનકભૂષણઃ ।
ભયઘ્નો ભવ્યફલદો ભક્તાભયવરપ્રદઃ ॥ ૭॥

શત્રુહન્તા શમોપેતઃ શરણાગતપોષકઃ ।
સાહસઃ સદ્ગુણાધ્યક્ષઃ સાધુઃ સમરદુર્જયઃ ॥ ૮॥

દુષ્ટદૂરઃ શિષ્ટપૂજ્યઃ સર્વકષ્ટનિવારકઃ ।
દુશ્ચેષ્ટવારકો દુઃખભઞ્જનો દુર્ધરો હરિઃ ॥ ૯॥

દુઃસ્વપ્નહન્તા દુર્ધર્ષો દુષ્ટગર્વવિમોચકઃ ।
ભરદ્વાજકુલોદ્ભૂતો ભૂસુતો ભવ્યભૂષણઃ ॥ ૧૦॥

રક્તામ્બરો રક્તવપુર્ભક્તપાલનતત્પરઃ ।
ચતુર્ભુજો ગદાધારી મેષવાહો મિતાશનઃ ॥ ૧૧॥

શક્તિશૂલધરશ્શક્તઃ શસ્ત્રવિદ્યાવિશારદઃ ।
તાર્કિકઃ તામસાધારઃ તપસ્વી તામ્રલોચનઃ ॥ ૧૨॥

તપ્તકાઞ્ચનસંકાશો રક્તકિઞ્જલ્કસન્નિભઃ ।
ગોત્રાધિદેવો ગોમધ્યચરો ગુણવિભૂષણઃ ॥ ૧૩॥

અસૃજંગારકોઽવન્તીદેશાધીશો જનાર્દનઃ ।
સૂર્યયામ્યપ્રદેશસ્થો યાવનો યામ્યદિઙ્ગ્મુખઃ ॥ ૧૪॥

ત્રિકોણમણ્ડલગતો ત્રિદશાધિપસન્નુતઃ ।
શુચિઃ શુચિકરઃ શૂરો શુચિવશ્યઃ શુભાવહઃ ॥ ૧૫॥

મેષવૃશ્ચિકરાશીશો મેધાવી મિતભાષણઃ ।
સુખપ્રદઃ સુરૂપાક્ષઃ સર્વાભીષ્ટફલપ્રદઃ ॥ ૧૬॥

॥ ઇતિ મઙ્ગલ એવં અઙ્ગારકાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Provided by Manda Krishna Srikanth
Proofread by KSR Ramachandran

*Shri Angaraka AshtottarashatanAma stotraM*
pdf was typeset on July 19, 2024

Please send corrections to *sanskrit@cheerful.com*